सोमायेति दक्षिणपूर्व्वार्द्धे इति भेदः । "ता उहैता देवताऊचुः यादृमा अग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नौ भूयिष्ठभाजौस्थोययोर्वामिदं युवयोरन्नानन्वाभजतमिति। तौ होचतुः किमावयोस्ततः स्यादिति यस्यै कस्यै च देवतायै हविर्निर्वपास्तद्वां पुरस्तादाज्यस्य यजानिति तस्माद्यस्यै कस्यै च देवतायै हविर्निर्वपन्ति तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति" शत० ब्रा० । इति तयोः सर्व्वदेवानां यज्ञस्यादौ आज्यभागदानं विहितम् । "आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन" कात्या० ३,३,१, ।

**आज्यभुज्** पु० आज्यं मन्त्रेण प्रक्षिप्तं विलीनं सर्पिः भुङ्क्ते भुज—क्विप् । १हविर्भुजि वह्नौ तन्मुखेन हविर्भोजे २देवे च ।

**आञ्जन** न० आ+अन्ज—ल्युट् । समन्तादभ्यञ्जने । "तेज वा एतदक्ष्योर्यदाञ्जनम्" ऐ० ब्रा० अञ्जनायां भवः अण् । २हनुमति वानरभेदे स च दाशरथिसहायः "दाशरथिवलैरिवाञ्जननीलनलपरिगतप्रान्तैः" काद० । अञ्जनस्येदम् अण् । ३अञ्जनसम्बन्धिनि त्रि० ।

**आञ्जनिक्य** न० अञ्जनाय हितम् ठञ् ततः पुरो० भावे कर्म्मणि च यक् । अञ्जनसाधनत्वे ।

**आञ्जनेय** पु० अञ्जनाया अपत्यं ढक् । अञ्जनागर्भजाते हनूमति वानरे । "अञ्जनागर्भसंभूतो वायुपुत्रो महाबलः" । हनुमत्स्तुतिः । [ अञ्जलिकरणे ।

**आञ्जलिक्य** न० आञ्जलिरेव स्वार्थे कन् ततः पुरो० यक् ।

**आञ्जिनेय** पु० अञ्जिन्यां भवः ढक् ( आजनाइ ) कीटभेदे ।

**आञ्जिहिषा** स्त्री आंहितुमिच्छा आ+अन्ह—सन्—अ । आगमनेच्छायाम् "आंहिष्ट जाताञ्जिहिषः" भट्टिः ।

**आटरूष** पु० अटरूष एव स्वार्थे अण् । वासकवृक्षे स्वार्थे कन् तत्रैव "आटरूषकवर्ण्णाभाहयाः यान्त्यनुयायिनाम्" भा० द्रो० प० ।

**आटविक** त्रि० अटव्यां चरति भवो वा ठक् । अरण्यचारिणि "प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः" मनुः "दण्डेषु सुहृत्कुमाराटाविकाः सामन्तसैनिकाद्यास्त" सा० द० २ "सैन्यभेदे। सैन्यानि च षड्विधानि। यथा "मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम्" मल्लिनाथ धृतकोषः । तदभिप्रायेणैव "षड्विधं बलमादायेति" रघुः ।

**आटवी** स्त्री अटव्याः सन्निकृष्टा पूः अण् । दक्षिणदिकस्थयवनपुरीभेदे । सहदेवदिग्विजयवर्ण्णने । "दूतैरेव वशे चक्रे करञ्चैनानदापयत्" "पाण्ड्यांश्च द्रविडांश्चैव सहितांश्चोड्रकेरलैः । अन्ध्रांस्तालवनांश्चैव कलिङ्गानुष्ट्रकर्णिकान् । आटवीञ्च पुरीं रम्यां यवनानां पुरं तथा" भा० स० प० ।

**आटि** पु० आ+अट्—इण् । १शरारिपक्षिणि । २मत्स्यभेदे च जातित्वेन स्त्रियां वा ङीप् । बाह्वादिषु पाठात् शाला-शब्दे परेऽस्योदात्तत्वम् ।

**आटिक** त्रि० आटाय गमनाय प्रवृत्तः ठञ् । गमनप्रवृत्ते स्वार्थे ष्यञ् । आटिक्यमप्यत्र न० ।

**आटिकी** स्त्री आटम् अटनमर्हति अण्—ङीप् । गृहाद्बहिर्गन्तुमर्हायामनुपजातपयोधरायां स्त्रियाम् । "मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राण उवास" छा० उ० । आटिक्याऽनुपजातपयोधरादिस्त्रीव्यञ्जनया जायया सह" इति भा० ।

**आटीकन** न० आटीक्यते ईषद्गम्यते आ+टीक—ल्युट् । वत्सानां प्रथममल्पगतौ स्वार्थे कन् तत्रैव हारा० लान्ततया पाठः प्रामादिकः ।

**आटीमुख** न० आट्याः शरारिभेदस्य मुखमिव मुखमस्य । सुश्रुतोक्ते शस्त्रभेदे "सूचीकुशपत्राटीमुखशरारीमुखेत्यादि विंशतिशस्त्रगणनायाम् सुश्रु० अर्द्धधारशब्दे विवृतिः ।

**आटोप** आ+तुप—घञ् पृषो० टत्वम् । १दर्पे, २संरम्भे, ३आड़म्बरे च । "साटोपमुर्व्वीमनिशं नदन्तः" माघः "मदजलदुर्द्दिनान्धकारगजघटितघनघटाटोपपरिपालितापि" काद० "साटोपं परिक्रम्य" वेणी० "कलापरुचिराटोपनिचितान् मुकुटानिव" भा० व० प० । ४वातजन्ये उदरशब्दभेदे "आमाटोपापचिश्लेष्मगुल्मक्रिमिविकारिणाम्" सुश्रु० ।

**आडम्बर** पु० आ+डवि—क्षेपे, अरन् । १हर्षे, २दर्पे, ३तूर्य्यस्वने, ४आरम्भे ५संरम्भे, ६अक्षिलोम्नि, घनगर्ज्जिते, ७आयोजने च । मत्वर्थे इनि । आड़म्बरिन् तद्युक्ते त्रि० । [ भेदे । ततः गोत्रप्रत्ययस्य बहुषु लुक् ।

**आडारक** पु० अड—उद्यमे घञ् ततः आरक् ऋषि-

**आडि** पु० अड—उद्यमे इण् । स्वनामख्याते मत्स्यभेदे । शरारीविहगे च पुंस्त्री० स्त्रीत्वे वा ङीप् स्वार्थे कन् आडिकाप्यत्र ।

**आडू** पु० अल ञ लस्य डः नि० वृद्धिः । (भेला) उडुपे ।

**आढक** पु० आढौकते आ+ढौक—घञ् पृ० । "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम् । पुष्कलानि च चत्वारि आढकः परिकीर्त्तित इति" मतभेदे चतुर्विंशत्यधिकशतमुष्टिमाने "द्वादशप्रसृतिभिः कुड़वस्तच्चतुर्गुणोऽस्य" प्रस्थाढकद्रोणा, इत्युक्ते द्विनवत्युत्तरशतप्रसृतिमाने च